[1]छितम्-छितः-छितवान् }
छातम्-छातः-छातवान् } छायितः, चिच्छासितः, चाच्छायितः-तवान्;

[2]काष्ठच्छः, [3]छायः, [4]काष्ठप्रच्छायः, [5]प्रच्छः, छायः, चिच्छासुः, [6]चाच्छः;
छातव्यम्, छाययितव्यम्, चिच्छासितव्यम्, चाच्छायितव्यम्;
छानीयम्, छायनीयम्, चिच्छासनीयम्, चाच्छायनीयम्;
[7]छेयम्, छाय्यम्, चिच्छास्यम्, चाच्छाय्यम्;
[8]ईषच्छानः-दुश्छानः-सुच्छानः; — —
छायमानः, छाय्यमानः, चिच्छास्यमानः, चाच्छाय्यमानः;
छायः, छायः, चिच्छासः, चाच्छायः;
छातुम्, छाययितुम्, चिच्छासितुम्, चाच्छायितुम्;
छातिः-छितिः, [9]आच्छा-छायना, चिच्छासा, चाच्छाया;
छानम्, छायनम्, चिच्छासनम्, चाच्छायनम्;
छात्वा-छित्वा, छाययित्वा, चिच्छासित्वा, चाच्छायित्वा;
[10]प्रच्छाय, प्रच्छाय्य, प्रचिच्छास्य, प्रचाच्छाय्य;

---

1. 'शाच्छोरन्यतरस्याम्' (7-4-41) इति तकारादौ किति प्रत्यये परतः इत्वविकल्पः। तेन रूपद्वयम्। एवं, क्तिनि, क्त्वाप्रत्यये च ज्ञेयम्।
2. 'आतोऽनुपसर्गे कः' (3-2-3) इति कर्मण्युपपदे कः। 'आतो लोप इटि च' (6-4-64) इत्याकारलोपः।
3. 'श्याऽऽद्व्यधास्रु—' (3-1-141) इति कर्तरि णप्रत्यये युगागमः।
4. उपसर्गसमभिव्याहारात्, कप्रत्ययाभावे, 'कर्मण्यण्' (3-2-1) इत्यणि युगागमे रूपम्।
5. 'आतश्चोपसर्गे' (3-1-136) इति कर्तरि कप्रत्ययः। आकारलोपः।
6. यङन्तात् पचाद्यचि (3-1-134), 'न धातुलोप—' (1-1-4) इति सूत्रस्य प्रत्याख्यानपक्षे, अकारस्य पृथग्लोपे 'यङोऽचि च' (2-4-74) इति यकारमात्रस्य लुकि, अकारलोपस्य स्थानिवद्भावेन, अजाद्यार्धधातुकङित्परकत्वात् 'आतो लोप इटि च' (6-4-64) इत्याकारलोपे रूपम्।
7. 'अचो यत्' (3-1-97) इति यति, 'ईद्यति' (6-4-65) इति आकारस्य ईकारे गुणः।
8. 'आतो युच्' (3-3-128) इति ईषदाद्युपपदेषु खलपवादो युच्।
9. 'आतश्चोपसर्गे' (3-3-106) इति स्त्रियां भावादावङ्।
10. 'अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यब् बाधते' (परिभाषा-55) इति वचनात् पूर्वं ल्यबादेशः। तादिकित्प्रत्ययपरकत्वाभावात् वैकल्पिकमित्वं न प्रवर्तते।